# संस्कृत-वार्ताः

**दिनाङ्क :- 26.03.2024**
**प्रातः - 06:55**

**जनार्दनरेड्डी-भाजपा**

कर्नाटकराज्ये केआरपीपी नेत्रा जी. जनार्दनारेड्डी इत्यनेन ह्यः स्वकीयस्य दलस्य भारतीयजनतापार्टीति दालेन सह विलयं कृत्वा लोकसभानिर्वाचनात् पूर्वं स्वपत्न्या अरुणालक्ष्मी इत्यनया सह पुनः दले सम्मिलितवान्। भाजपेतिदलस्य नेता बी एस येदियुरप्पा राज्यभाजपा अध्यक्ष: बी.वाई. रेड्डी इत्यनेन उक्तं यत् सः न कस्यापि शर्तेन दले सम्मिलितवान्, किमपि पदं न इच्छति। तत्रैव कांग्रेसदलेन लोकसभानिर्वाचनाय पञ्चप्रत्याशिनां षष्ठतमा सूची प्राख्यापिता। राजस्थानस्य कोटातः प्रहलाद गुंजालः, अजमेरतः रामचन्द्र चौधरी, राजसमन्द निर्वाचनक्षेत्रतः सुदर्शनरावतः, एते प्रत्याशिनः घोषिताः। तमिलनाडु राज्यस्य तिरुनलवली क्षेत्रात् विधिवेत्ता सी. राबर्ट ब्रूस प्रत्याशित्वेन घोषितः।

**वर्णोत्सवः होल्युत्सवः**

वर्णोत्सवः होल्युत्सवः ह्य: सम्पूर्णे देशे वर्णपर्व, होली इति सोत्साहम् अमन्यत। अयं उत्सवः शुभस्य दुष्टतायाः उपरि विजयस्य सूचकत्वेन आमन्यते, वसन्तर्तोः आगमनस्य च परिचायकः अयम् उत्सवः। अस्मिन् दिने जनाः परस्परं वर्णं प्रयोजयन्ति, अभिवादनस्य आदानं प्रदानं च कुर्वन्ति, मिष्टान्नस्य आस्वादनं कुर्वन्ति, वृद्धानां आशीर्वादं च याचन्ते। राष्ट्रपतिः द्रौपदी मुर्मूः उपराष्ट्रपतिः जगदीपधनखरः च होली-उत्सवे देशवासिनां अभिवादनं कृतवन्तौ।

**जयशंकर - सिङ्गापुरः**

विदेशमन्त्रिणा डॉ. एस जयशंकरेण ह्यः सिङ्गापुरस्य प्रधानमन्त्रिणा ली सिन् लूङ्ग इत्यनेन सह मेलनं कृतम्। उपवेशनावधौ उभौ नेतारौ हिंद-प्रशांत-पश्चिम-एशिया इत्येतयोः विषये विचारविनिमयं कृतवन्तौ । एकस्मिन् सामाजिकान्तर्जाल सन्देशे डॉ जयशंकरः अवदत् यत् भारतस्य सम्बन्धेषु तस्य सकारात्मकभावनाः सदैव अस्माकं सम्बन्धानां कृते बलस्य स्रोत-सदृशाः एव सन्ति।

**उज्जैनम्**

मध्यप्रदेशस्य उज्जैनमहाकालमन्दिरे दुरापन्नेन अग्निप्रकोपेण न्यूनातिन्यूनं चतुर्दश जनाः व्रणिता:। मध्यप्रदेशे ह्य: प्रातः उज्जैननगरस्य महाकालेश्वरमन्दिरस्य अभयारण्ये अग्निः प्रज्वलितः। भस्म-आरात्रिकाले एषा दुर्घटना घटिता। अस्यां घटनायां पुरोहितसहिताः चतुर्दशजनाः व्रणिता: सन्ति।

**आईपीएल्**

आईपीएल क्रिकेट्-क्रीडायां ह्य: बेङ्गलूरुनगरस्य एम.चिन्नास्वामी-क्रीडाङ्गणे रॉयल चैलेन्जर्स् बेङ्गलूरु-दलेन पञ्जाब-किङ्ग्स्-इत्येतं दलं चतुर् स्तोभैः पराजितम्। तत्रैव अस्मिन क्रिकेटमालिका-स्पर्धायां अद्य चेन्नई सुपर किङ्ग्स्-गुजरात टाइटंस् इत्येतयो: मध्ये एम्.ए. चिदम्बरं इत्यस्मिन् क्रीडांग्णे सायं सार्धसप्तवादने भविष्यति।

**।। ति वार्ताः ।।**